श्रीनेपालराष्ट्रियाभिलेखालयस्थ हस्तलिखितपुस्तकानां

बृहत्सूचीपत्रम्

यस्यायं

तन्त्रविषयकः

चतुर्थो भागः

तस्यायं द्वितीयखण्डः

राष्ट्रियाभिलेखालयतः संपादितः

२०२५ तमे वैक्रमाब्दे प्रजातन्त्रदिवसस्योपलक्ष्ये प्रकाशितः



पुरातत्त्वप्रकाशनमाला ४४

नेपालराष्ट्रियाभिलेखालयस्थ हस्तलिखितपुस्तकानां

बृहत्सूचीपत्रम्

यस्यायं

तन्त्रविषयकः

चतुर्थो भागः

तस्यायं द्वितीयखण्डः

बुद्धिसागरशर्मणः अध्यक्षतायां

राष्ट्रियाभिलेखालयतः संपादितः प्रकाशितश्च

प्रथम संस्करणम् ५००   मूल्यम रु.

विभागीय वक्तव्य

बृहत्सूचीपत्र भाग ४को तन्त्रसूचीको ,, दोश्रोखण्ड ,' राष्ट्रको सेवामा प्रस्तुत गर्दछौं । यसमा ५१३ ग्रन्थहरु समावेश भएका छन् । यस पछि ,, तेश्रोखण्ड ,' पनि समयमा नै प्रकाशित गरिने छ । राष्ट्रिय अभिलेखालयको समुद्घाटन नेपाली संस्कृतिका महानतम संरक्षक श्री ५ महाराजाधिराज महेन्द्रवीरविक्रमशाहदेवका बाहुलीबाट विगतवर्ष सुसम्पन्न भए पछि नयाँ उत्साह र उमङ्गका साथ हाम्रो प्राचीन गौरवको अझै बढी खोजी र अध्ययन तथा प्रकाशन गर्ने दिशामा विभागीय अनुसन्धानकर्ताहरु गम्भीरता पूर्वक कार्यरत हुनुहुन्छ । तन्त्रको अध्ययन तथा यसको विद्वता पूर्ण र प्रमाणिक अनुसन्धान गर्ने दिशामा नेपालमानिकै काम हुन बाकी नै छ । आशा छ यस सूचीको प्रकाशनले सरकारी तथा गैर सरकारी (दुवै स्तरमा) यसक्षेत्रमा कार्य गर्न सबैलाइ अनुप्रेरित गर्नेछ ।

यस प्रकाशनका निम्ति मेहनत गर्ने सबैमा धन्यबाद

२०२५ — ११ ७
प्रजातन्त्र दिवस

रमेश ज़ङ्ग थापा
निर्देशक
श्री ५को सरकार, पुरातत्व बिभाग

राष्ट्रियाभिलेखालयीयं वक्तव्यम्

यदा प्रभृति नेपालीया विद्वांसः स्वदेशकार्ये किमपि कर्तुं स्वाधीनाः संवृत्तास्तदा प्रभृति पुस्तकालयीया विद्वांसोऽपि पुस्तकालयस्य विकासार्थं योजनां विरचय्य कार्याण्यारभन्त; तत्र समस्तपुस्तकानां विषयविभागानुसारं वर्णानुक्रमानुविधायि बृहत्सूचीपत्रं मुद्रणीयमिति सिद्धान्तमनुसृत्य ज्यौतिष-साहित्य-काव्य-नाटक-पुराणेतिहास-व्याकरणायुर्वेद-बौद्ध-शास्त्रसंबन्धीनि बृहत्सूचीपत्राणि मुद्रितानीति जानन्त्येव तत्र भवन्तो विद्वांसः ।

तन्त्रशास्त्रेऽपि अकारादिग्रन्थादारभ्य पुष्परत्नाकरपर्यन्तानां ५१२ संख्यकानां तन्त्रपुस्तकानां सूचीपत्रं चतुर्थभागस्य प्रथमखण्डात्मत्वेन पूर्वमेव प्रकाशमुपगतम्, अथ भवतां करकमलेषु अधुना सादरमुपह्रियमाणो द्वितीयःखण्डः कारणवशाद् विलम्बेन प्रकाशितः । अस्मिन् द्वितीयखण्डे प्रतिष्ठातन्त्रादारभ्य हाहारावतन्त्रपर्यन्तानां ५१३ संख्याकानां पुस्तकानां समावेशोऽस्ति । अस्माभिः सूचीसंपादनकार्यानन्तरं संकलितानां तथा नेपालराष्ट्रियपुस्तकालयतः समागतानां च पुस्तकानामत्र समावेशो नास्ति । तेषां पृथक् पश्चान्मुद्रणं भविता । मुद्रणागारस्य मुद्रकस्य च संशोधकस्य च वैयात्याद् असावधानत्वात् दृष्टिदोषाच्च तथा कारणान्तरादपि सन्त्यत्र भूयांसो दोषास्तथापि अस्मिन् विश्वविश्रुते संग्रहे कीदृशाः कति के के च ग्रन्थाः सन्तीति जिज्ञासमानानां विदुषामुत्कण्ठापूर्तये स्वल्पामपि सहायतां करिष्यतीति विश्वस्य अकरणान्मन्दकरणं श्रेय इति न्यायमनुसृत्य कृतोऽयं प्रयासो यदि गवेषणापरायणानां कृते किमपि स्वल्पं चोपकुर्यात् तदपि बह्वेव मन्येतेति मनस्यांश्वस्य "आपरितोषाद् विदुषां न साधु मन्ये प्रयोगविज्ञानम्" इति महाकविवाक्यं स्मृत्वा अत्र संपादनसंशोधनादिकर्मणि व्यापृताः पण्डित देवीप्रसाद-घनश्याम बाबुकृष्णादयो विद्वांसो धन्यवादार्हा इत्यभिनन्द्य च लेखनीव्यापाराद् विरमति ।

राष्ट्रियाभिलेखालयः
रामशाहपथः
काष्ठमण्डपः (काठमाण्डू)
वि. सं. २०२५ । ११ । ७

तत्र विदुषां वशंवदः
बुद्धिसागरशर्मा पराजुलिः
अध्यक्षो—
राष्ट्रियाभिलेखालयस्य

अस्मिन् तन्त्रसूचीपत्रे समागतानां ग्रन्थकाराणां नामावली





हिन्दुत्वका एकमात्र प्रेरणापुञ्ज
श्री ५ महाराजा धिराज
महेन्द्रबीरविक्रमशाहदेब

प्रतिष्ठातन्त्रम्

निःश्वासमहातन्त्रान्तर्गतम्

क्रमाङ्कः प्र. १००३ विषयाङ्कः

ग्रन्थकारः । ताडपत्राणि । प्राचीननेवारी लिपिः । पङ्क्तयः ६
आकारः १२×२ । ग्रन्थसंख्या २३०० । पत्रसंख्या १०३ । समय ने. सं. २५४,

आदिवाक्यम्—

ॐ नमः शिवाय । कैलासशिखरे रम्ये नानारत्नोपशोभिते ।
शिद्धविद्याधरा कीर्णे यक्षगन्धर्वसेविते

तत्रासीनो महादेवः श्रीकण्ठेश्वरपूजितः ।
प्रणम्य चरणौ तस्य देवीचरण (वचन) मब्रवीत् ।

भगवन्सर्वधर्मज्ञ लोकनाथ जगत्पते ।
प्रतिष्ठां देवदेवस्य श्रोतुमिच्छामितस्वतः ॥

पुष्पिकावाक्यानि—

इति निःश्वासाख्ये महातन्त्रे बीजभेदे प्रतिष्ठातन्त्रे देव्यामते प्रश्नपटलः प्रथमः ।
,, ,, इति स्थापकस्थापतिलक्षणः पटलः द्वितीयः ।
,, ,, इति भिन्नयोनिपटलस्तृतीयः ।
,, ,, इतिरत्नजलिङ्गलक्षणपटलश्चतुर्थः ।
,, ,, इति पार्थिवलिङ्गलक्षणपटलः पञ्चमः ।

"　"　इति वनप्रवेशपटलः षष्ठः ।
"　"　इति वृक्षलक्षणपटलः सप्तमः ।
"　"　इति पाषाणलक्षणपटलः, अष्टमः ।
"　"　इति वनाधिवासपटलः, नवमः ।
"　"　इति वृक्षग्रहणलक्षणपटलः दशमः ।
"　"　इति लिङ्गस्य भागमानलक्षणपटलमेकादशः ।
"　"　इति लिङ्गपरिग्रहणपटलः, द्वादशः ।
"　"　इति मूर्ति ... ... लक्षणपटलः एकविंशतितमः ।
"　"　इति सामाहिपरिखालक्षणपटलः द्वाविंशतितमः ।
"　"　इति मन्त्रलक्षणपटलः, त्रयोविंशतियः (विंशः)
"　"　इति अधिवासनकर्मपटलः, चतुर्विंशतितमः ।
"　"　इत उत्तरं ६३ पटलपर्यन्तो ग्रन्थस्त्रुटितः पत्राङ्कामितुक्रमेण लिखितानि ।
"　"　इति जीर्णद्वारविधानपटलः, चतुःषष्टितमः ।
"　"　इति वृषभलक्षणं पञ्चषष्टितमः पटलः ।
"　"　इति खटकानां विधिशेषणे (?) षट्षष्टितमः पटलः ।
"　"　इति देव्यामते भूपरीक्षो सप्तषष्ठितमः पटलः ।
"　"　इति देव्यामते हस्तलक्षणम् ; अष्टषष्टिमः (तमः) पटलः ।
"　"　इति भूप्रमाणलक्षणपटल ऊनसप्ततिः (तमः) ।
"　"　इति देव्यामते वनयात्रालक्षणं सप्ततितमः पटलः ।
"　"　इति देव्यामते महातन्त्रे भूमिविशुद्धिलक्षणमेकसप्ततितमः पटलः ।
"　"　इति देव्यामते शङ्कुलक्षणं द्विसप्ततितमः पटलः ।
"　"　इति देव्यामते दीक्षाविधानलक्षणं त्रिसप्ततितमः पटलः ।
"　"　इति देव्यामते चयलक्षणं पञ्चसप्ततितमः पटलः ।
"　"　इति देव्यामते वास्तुविभागलक्षणं षट्सप्ततितमः पटलः ।
"　"　(अत्र सप्तसप्ततितमः पुष्पिका नास्ति।)
"　"　इति देव्यामते वास्तुदेवाभिधानाष्ट(तम् अ) सप्ततिम(तमः) पटलः
"　"　इति देव्यामते सिरा(शिरो)मर्मपरिज्ञान एकोनाशीति(तमः) पटलः ।
"　"　इति देव्यामते शल्योद्धारलक्षणन्नाम (अ)मशीति (तमः) पटलः ।
"　"　इति सूत्रपातलक्षण एकाशीति(तमः) पटलः ।
"　"　इति देव्यामते वास्तुयाग(गो) द्वाशीतिम (तमः) पटलः ।
"　"　इति देव्यामते खाता(त) दिक्सूत्रावरणलक्षणं त्रया(य)शीतिमः (तमः) पटलः

" " इति शिखान्यासलक्षणश्चतुरा(र)शीतिम(तमः) पटलः ।
" " इति पादपीठलक्षणं पञ्चाशीतिम(तमः) पटलः ।
" " इति पीठोपरि दिक्सूत्रतः ? लक्षणं षट् आशोति (षडशीतितमः) पटलः ।
" " इति सप्ताशीति (तमः) पटलः ।
" " इति प्रासादावयवलक्षणं देव्यामते प्रासादभूविभागवर्णन (म्) अष्टाशीति (तमः) पटलः ।
" " इति नामप्रमाणलक्षणे उननवति (तमः) पटलः ।
" " इति इतिदेव्यामते गर्भभित्तिप्रमाणनियमे नवति (तमः) पटलः ।
" " इति देव्यामते प्रासादविषयलक्षण(णं) एकनवति (तमः) पटलः ।
" " इति देव्यामते द्वारलक्षणं द्विरिनव (तितमः) पटलः ।
" " इति देव्यामते प्रासादद्रव्यलक्षणपटलः(स्) त्रयोनवरि (तितमः) पटलः (स्) ।
इति देव्या मते प्रासादानां विशेषेण सामान्यश्चय? । लक्षण (णं) चतुर्न वरि(तितमः) पटलः ।
इति देव्या मते प्रासादानां समुदायेन विशेषलक्षणं पञ्चनवरि (तितमः) पटलः ।
" प्रासादोद्यमतं षष्ठ (षण्) नवरि (तितमः) पटलः ।
" " इति देव्या मते गुरुशिष्यविशेषणां सप्तनवरितम (तितमः) पटलः ।
" " इति देव्यामते शास्त्रविशेषणम, अष्टनवति (तमः) पटलः ।
" " इति देव्या मते छु (क्षु)धालक्षण एकून शतितमः (एकोन शतितमः) पटलः ।
" " इति देव्या मते भूमिबन्धशततमः (शतिमः) पटलः ।
" " इति देव्यामते लेप्यबन्धलक्षण एकशतिमः (एकाधिकशततमः) पटलः ।
" " इति देव्यामते भित्तिबन्ध (न्धो] द्वशतिमः (द्विशततमः) पटलः
" " इति देव्यामते योज्यायोज्यलक्षणं त्रयोशवति (त्र्यधिकशततमः)
" " इति देव्यामते वेधलक्षणं चतुरोत्तरशत्तिम (चतुरधिकशत तम्) पटलः ।
" " इति देव्यामते महातन्त्रे वास्तुपटलः ।
" " इति निःश्वासाख्यमहातन्त्रे प्रतिष्ठातन्त्र समाप्तम्

समाप्तिः— वेदे मन्मथवाणे नरनेत्रे वत्सरे सुसंयाते । फाल्गुनशुक्ले षष्ठ्यां भृगुवासरे सुभगे ।
श्रीमन्नरेन्द्रदेवे राजेन्द्रराजराज साद्वये । नेपालेऽस्मिन्गुणवतिपशुपतिपादाङ्कपरिपूते ।
भक्तग्रामनिवासीवटुकमहिपालपुत्रसंभारो । देव्यामताभिधानं पुस्तकमभिलिखति-
भक्ति चित्तेनसर्व शिवमस्तु ॥ ॥ ॥

प्रतिष्ठातन्त्रम्

निः श्वासतन्त्रान्तर्गतम्



क्रमाङ्कः प्र० १२६१ विषयाङ्कः

ग्रन्थकारः । ताडपत्राणि । नेवारी लिपिः ।
पङ्क्तयः । ७ । आकारः १२३⁄४×२१⁄८ । ग्रन्थसंख्या ८०० पत्रसंख्या ३४ ।
पूर्णप्रायम् ।

प्रतिष्ठातन्त्रम्

निःश्वासतन्त्रान्तर्गतम्



क्रमाङ्कः प्र० ४१ विषयाङ्कः

ग्रन्थकारः । नेपालीयं कागतम् । नेवारी लिपिः ।
पङ्क्तयः ८ । आकारः १३×३१⁄२ । ग्रन्थसंख्या ४००० । पत्रसंख्या २०४ ।
मध्यखण्डितम् ।

प्रतिष्ठातन्त्रम्

निःश्वासतन्त्रान्तर्गतम्



विषयाङ्कः

क्रमाङ्कः प्र० ८४

ग्रन्थकारः । ताडपत्राणि । प्राचीन नेवारीलिपिः ।
पङ्क्तयः ६ । ७ आकारः १२१⁄८×२ । ग्रन्थसंख्या ३२०७ । पत्रसंख्या २४ ।
मध्यखण्डितं समाप्त्यन्तम् ।

संवत् आचुल् २७१ कार्तिक शुक्लाष्टम्यां शुक्लदिने राजाधिराजपरमेश्वरः श्रीशान्ददेवः ? नृपतौ लिखितमिति ।

प्रतिष्ठातन्त्रम्



क्रमाङ्क च. १३६ विषयाङ्कः

ग्रन्थकारः सुन्दराचार्यः । नेपालीयं कागतम् । नेवारीलिपिः । पङ्क्तयः १० । आकारः १३×४ । ग्रन्थसंख्या ३००० । पत्रसंख्या ११७ ।

प्रतिष्ठातन्त्रम्
मोहचूडोत्तरम्
(आग्नेयमहातन्त्रान्तर्गतम्)



क्रमाङ्क प्र॰ १६३३ विषयाङ्कः

ग्रन्थकारः । ताडपत्राणि । प्राचिन देवनागरीलिपिः । पङ्क्तयः ३ । ४ । आकारः ११३⁄४×१⁄८ । ग्रन्थसंख्या १००० । पत्रसंख्या १०१ । सम्पूर्णम् ।

ॐ नमः सि (शि) वाय । स्कन्दं ब्रह्मविदं शान्तं सर्वज्ञपदसंस्थितम् । प्रणिपत्य हरिः प्राह जानुभ्यामवनिस्थितः । स (श) क्रउवाच । त्वत्प्रसादात्परिज्ञातुं मोहचूरं (डं) महाप्रभो तत्राभूतित्वया लिङ्गं प्रासादश्च सभासतः । समासेन यतः प्रोक्तं तस्मान्नैवाव धारितम् । मोहचूडोत्तरं शास्त्रं तदर्थं वक्तु महंसि ॥ इति तस्यगिरं श्रुत्वा जगाद हिमजा सुताः । ·· ···· ··· ··· गारिकं प्रवक्ष्यामि शृणु तस्माच्छतक्रतो । देवासुरनरा यक्षा मुनयोवीतमत्सराः । लिहारा वनतः सिद्धा गतामुक्तिं च सरस्वतीम् । भुक्तिमुक्तिः परिप्राप्ति कारणं वचनात्ततः ।।

पुष्पिका वाक्यानिः--

इति मोहचूडोत्तरे अव्यक्तमुखलिङ्गप्रख्याने प्रथमः पटलः ।
इति मोहचूडोत्तरे व्यक्तलिङ्गप्रख्याने द्वितीयः पटलः ।
इति मोहचूडोत्तरे प्रासादप्रख्याने तृतीयः पटलः ।

इति मोहचूडोत्तरे प्रासादप्रख्याने चतुर्थः पटलः।
इत्याग्नेयमहातन्त्रे· प्रतिष्ठातन्त्रं मोहचूडोत्तरं समाप्तम्। संवत् ८०६। फाल्गुणवदि १०। भौमे। श्रीमहागणेश्वरे मठावस्थितपण्डिताचार्यभट्टारकः श्रीसर्वगणेन पुस्तकं लिखितम्।

प्रतिष्ठातन्त्रम् (मोहचूड़ोत्तरम्)



क्रमाङ्कः-प्र ८७ विषयाङ्कः-१७

ग्रन्थकारः—शीवः। नेपालीयं कागतम्। नेवारी लिपिः। पङ्क्तय ७। आकारः १४$\frac{3}{4}$×१$\frac{3}{4}$। । ग्रन्थसंख्या ११००। पत्रसंख्या १६। पूर्णः।

प्रतिष्ठातन्त्रस्य प्रकिर्णपत्राणि



क्रमाङ्कः- प्र. १६०६ विषयाङ्कः

ग्रन्थकारः सुन्दराचार्यः। नेपालीयं कागतम। नेवारी लिपि। पङ्क्तय. ८। आकारः १३$\frac{3}{4}$×२$\frac{1}{4}$। ग्रन्थसंख्याः ७५०। पत्रसंख्या २६।

प्रत्यङ्गिरामन्त्रोद्धारः
कराङ्गिणितन्त्रान्तर्गतः



क्रमाङ्कः प्र. १०६ विषयाङ्कः

ग्रन्थकारः । ताडपत्राणि । नेवारी लिपिः । पङ्क्तयः ६। आकारः १२$\frac{3}{4}$×१$\frac{3}{4}$। ग्रन्थसंख्या ७५०। पत्रसंख्या १०।

प्रत्यङ्गिरामन्त्रोद्धारः



क्रमाङ्कः तृ. ८९

विषयाङ्कः

ग्रन्थकारः— — — — । नेपालीयं कागतम् । नेवारी लिपिः । पङ्क्तयः ५ । आकारः ८$\frac{5}{8}$×२$\frac{3}{4}$ । ग्रन्थसंख्या ३० । पत्रसंख्या ८ । पूर्णः ।

प्रत्यङ्गिरामन्त्रोद्धारपत्रम्



क्रमाङ्कः प्र. १२०

विषयाङ्कः

ग्रन्थकारः .... । नेपालीयं कागतम् । देवनागरी लिपिः । पङ्क्तयः ८ । आकारः४$\frac{1}{2}$×२$\frac{1}{2}$ । ग्रन्थसंख्या ४ । पत्रसंख्या १ ।

प्रपञ्चसारः



क्रमाङ्कः प्र. १६३३

विषयाङ्कः

ग्रन्थकारः शङ्कराचार्यः । ताडपत्राणि । मैथिली लिपिः । पङ्क्तयः ६ । आकारः १३$\frac{3}{4}$×२ । ग्रन्थसंख्या ३००० । पत्रसंख्या १२६ ।

आदिवाक्यम्—

ॐ महागणेशाय नमः। अकचटतपयाद्यैः सप्तभिर्वर्गैर्विरचितमुखबाहुपादमध्याख्यहृत्का । सकलजगदीशा शाश्वती विश्वयोनिर्वितरतु परिशुद्धिं चेतसः शारदा वः । अथाभवन् ब्रह्महरीश्वराख्या पुराप्रधानात्प्रलयावसाने । गुणप्रभिन्ना जगतोस्यसृष्टिस्थितिक्षयस्पष्टविनिष्ठचेष्टाः स्वनिष्पत्तिञ्च कृत्यञ्च ते विचिन्त्यसमाविदन् ॥ वक्तारमजमव्यक्तरूपं मायिनंविभुम् । मूर्त्याभासेन दुग्धाब्धौभषशङ्खसमाकुले मरुत्संघट्टनोत्कीर्ण लहरीकणशीतले । उद्यदादित्यकिरणः प्रशान्त शिशिरोदये । पूर्णचन्द्रकरामर्श प्रतिक्षुब्धजलाकरे । अनन्तभोगधिमले फणायुतविराजिते । शयितं शार्ङ्गिणं शौरिं शार्वं पद्मभुवस्तदा ॥ तुष्टुवुःहृष्टमनसो विष्टरश्रवसं विभुम् । सूक्तिभिः स्तुतिभिः प्रीतः स्वमूर्तिं समदर्शत् । नीलोत्पलदलप्रख्यां नीलकुञ्जितमूर्धजाम् । अष्टमीचन्द्रबिम्बाभ

ललाटामायतभ्रूषम् । रक्तारविन्दनयना मुन्नासांमरुणाधराम् । मन्दस्मिताग्रमुखीं लसन्मकरकुण्डलाम् । कम्बुग्रीवां पृथु (क) स्यां सविसराभुजमण्डलाम् । अनेक रत्नप्रत्यूहवलयाङ्गदमुद्रिकाम् । हारतारावलीराजत्पृथुरोठ्योमभण्डलीम् । कौस्तु भोद्भासितोपान्तां — — श्रीवत्सद्युति दीपिताम् । लसदौदरिवन्धभास्वरां संभृतो दराम् । — — गंभीरनाभिं विपुलजघनां पीतवासाम् । पृथुवृत्तोरुमापूर्ण जानुमण्डल बन्धुराम् ॥ वृत्तजङ्घां गूढगुल्फां प्रपदाजितकच्छपाम् । चक्रस्वस्तिकशङ्खब्ज ध्वजाङ्कितपदद्वयाम् । तां दृष्ट्वा तरलात्मानो विध्यधोक्षजशङ्कराः । अतिष्ठन्नति कर्तव्य-मूढास्तत्राब्रवीदजः ।

इति श्री प्रपञ्चसारे प्रथमः पटलः ।
” ” द्वितीयः पटलः ।
” ” तृतीयः पटलः ।
” ” चतुर्थः पटलः ।
” ” पञ्चमः पटलः ।
” ” षष्ठः पटलः ।
” ” सप्तमः पटलः ।
” ” अष्टमः पटलः ।
” ” नवमः पटलः ।
” ” दशमः पटलः ।
” ” एकादशः पटलः ।
” ” द्वादशः पटलः ।
” ” त्रयोदशः पटलः ।
” ” चतुर्दशः पटलः ।
” ” पञ्चदशः पटलः ।
” ” षोडशः पटलः ।
” ” सप्तदशः पटलः ।
” ” अष्टादशः पटलः ।
” ” एकोनविंशतितमः पटलः ।
” ” विंशतितमः पटलः ।
” ” एकविंशतितमः पटलः ।
” ” द्वाविंशतितमः पटलः ।
” ” त्रयोविंशतितमः पटलः ।
” ” चतुर्विंशतितमः पटलः ।

,, ,, पञ्चविंशतितमः पटलः ।
,, ,, षट्विंशतितमः पटलः ।
,, ,, सप्तविंशतितमः पटलः ।
,, ,, अष्टाविंशतितमः पटलः ।
,, ,, एकोनत्रिंशतितमः पटलः ।
,, ,, त्रिंशतितमः पटलः ।
,, ,, एकत्रिंशतितमः पटलः ।
,, ,, द्वात्रिंशतितमः पटलः ।
,, ,, त्रयस्त्रिंशतितमः पटलः ।

इति श्री प्रपञ्चसारः समाप्तः ।
लक्ष्मणसेन संवत् ४०८ कार्तिकशुक्लपञ्चम्याम् ॥

प्रपञ्चसारः



क्रमाङ्कः-प्र २०६ विषयाङ्कः

ग्रन्थकारः शङ्कराचार्यः । मध्यदेशीयं कागतम् । मैथिली लिपिः । पङ्क्तयः १२ । आकारः-१२$\frac{5}{8}$×४$\frac{3}{8}$ । ग्रन्थसंख्या ३३०० । पत्रसंख्या ८७ । ने. सं. ८०८ ।

प्रपञ्चसारः



क्रमाङ्कः प्र. १३१२ विषयाङ्कः

ग्रन्थकारः शङ्कराचार्यः । नेपालीयं कागतम् । नेवारी लिपिः । पङ्क्तयः ८ । आकारः १५×४$\frac{1}{2}$ । ग्रन्थसंख्या ३००० । पत्रसंख्या १४६ । ३६ पटलान्तः पूर्णः
ने. सं. ८०८ कार्तिक शुक्ल ६ थ्व कुन्हु श्रीश्री सुमतिजयजितामित्रमल्लदेवसन भागिराम प्रधानाङ्ग यो बेलस थ्व प्रपञ्चसार महायत्नेन दयका अनहेलायायमते व यत्नपूर्वक निदाम वाय माल ॥

प्रपञ्चसारतन्त्रम्



क्रमाङ्कः प्र. ६६७ विषयाङ्कः

ग्रन्थकारः शङ्कराचार्यः । नेपालीयं कागतम् । प्राचीनदेवनागरी लिपिः । पङ्क्तयः ६ । आकारः १०×४½ । ग्रन्थसंख्या ६००० । पत्रसंख्या १६६ ।

इति संवत् १९५४ साल मिति चैत्र शुदि ७ रोज ३ तद्दिने जीर्ण उद्धार लिषि (खि)तम् ।

प्रयोगचूडामणिः



क्रमाङ्कः तृ. १३६ विषयाङ्कः

ग्रन्थकारः शैवाचार्य दामोदरगुप्तः । नेपालीयं कागतम् । नेवारी लिपिः । पङ्क्तयः ४ । आकारः ६३×३¼ । ग्रन्थसंख्या ३०० । पत्रसंख्या ५७ ।

आदिवाक्यम्ः—

ॐ नम देव्यैनमः । श्रीकण्ठकण्ठलुण्ठिताधरपल्लवश्रीः श्रीनाथवक्षसि कृताङ्घ्रिसरोरुहश्रीः । श्री वामयोनिमुखपङ्कजलोचनश्रीः श्रीः श्रीपदाभवतु सा जगतोमलश्रीः । गुरुचरणसरोजं शङ्करं योनिवृन्दं फणिवरनुरधात्रीं पार्वतीं मातृचक्रम् ॥ सकलगुणविधिज्ञास्ते अभक्तान्नुभक्तां स्तनुषननगनोतिः सर्वकालं नमामि । नोज्ञान ········ कवित्व गर्वानोराजसमोन मदान्ध नुया देशान्तरं यद्भ्रमते यमाप्तं तल्लिख्यते संस्मरणाय यत्नात् सद्गुरुपादाम्भोजं नानादेशीयसज्जनजनेभ्य सिद्धदेशात् ज्ञात्वा प्रयोग चूडामणिम्वक्षे ।

पुष्पिका वाक्यानि—

प्रत्युज्जीवपर्यायः प्रथमः ।
रसायनपर्यायविधिः द्वितीयः ।
इति श्री प्रयोगचूडामणिः समाप्तम् ।

अन्तिमवाक्यम्—

आचार्य वैद्यकविभि भी)राजसभायां साधितो यत्नात् । अपरीक्षं नैवकार्यं शंसयजालं सधा यद्भि । अस्य शिष्यजनेभ्यो विधिवत्कृतोपदेशः कतिभिः । योगाः सदोष योग्याः पुस्तकमालोक्येनैव करणीयाः । श्री देवपाल नृपतेः पोतामात्यस्तस्य कृतिरियम् । आमात्रापलित शैवाचार्य दामोदरस्येति ।

इति श्री श्रीप्रयोगचूडामणिः समाप्तम ।

प्रयोगचूडामणिः



विषयाङ्कः

क्रमाङ्कः प्र० २४७

ग्रन्थकारः श्रीदेवपालनृपतिः । नेपालीयं कागतम् । नेवारी लिपिः । पङ्क्तयः ८ । आकारः१४$^{१}_{८}$×४$^{१}_{८}$ । ग्रन्थसंख्या ४०० । पत्रसंख्या १५ । सम्पूर्णः ।

प्रस्तारसहस्राक्षरीमन्त्रोद्धारः



विषयाङ्कः

क्रमाङ्कः छि. २६१

ग्रन्थकारः । नेपालीयं कागतम् । नेवारीलिपिः । पङ्क्तयः ५ । आकारः ६$^{३}_{८}$×२$^{५}_{८}$ । ग्रन्थसंख्या ६० । पत्रसंख्या २० । अपूर्णः

प्रायश्चित्तपटलसङ्ग्रहः

नानातन्त्रोक्तः

विषयाङ्कः

क्रमाङ्कः प्र. ७६

ग्रन्थकारः । नेपालीयं कागतम् । नेवारीलिपिः । पङ्क्त्योऽनियता । आकारः१०$^{३}_{४}$×४ । ग्रन्थसंख्या १५०० । पत्रसंख्या ११३ ।

प्रासाददीपिका मन्त्राटिप्पणी

क्रमाङ्कः प्र. १०७५ | विषयाङ्कः

ग्रन्थकारः । ताडपत्राणि । नेवारीलिपिः । पङ्क्तयः ५ । आकारः १२½×२ ।
ग्रन्थसंख्या २७०० । पत्रसंख्या १४६ । १६ आन्हिकान्ता पूर्णा ।

आदिवाक्यम्—

ॐ नमः शिवाय । करिवरकारवक्त्रं भृङ्गझङ्काररम्यं ध्वनिचकितकपोलप्रान्तरक्त च नेत्रे । अभिमतवरदाता विघ्नेस'''' ''' जनानां अतुलविदितवीर्यो यःसदा तं नमामि ॥ ॐ नमः शिवाय ॥ श्रीगुरुभ्यो नमः ॥ निष्कलं सकलं मिश्रं शिवं नत्वा गुरुं ततः ॥ प्रासाद-दीपिकामन्त्रटिप्पणं लिख्यते तदा ॥ ततः प्रातरुत्थाय निजहृदयसरसीरुहे शिवं वक्ष्यमाणवद्विचिन्तयेत्स्नानद्रव्यैरुपेतः स्नानोचितदेशं गत्वा तत्रताणि (नि) चिस्थले निधाय मलोत्सर्गशौचदन्तधावनादि यथोक्तवद्विधाय यथैव स्नानाय शरखातो हृदोद्धृतां शिरसो निक्षिप्तां शरशोधितां शिवोद्धृततृणलोष्ठां कवचं त्रिधा ।

पुष्पिकावाक्यानि—

इति प्रथमान्हिकम् ।
इति सूर्यपूजानाम द्वितीयान्हिकम् ।
इति भूतशुद्धिर्नाम तृतीयान्हिकम् ।
इति अन्तर्यागोनामचतुर्थान्हिकम् ।
इति लिङ्गशुद्धिर्नाम पञ्चमान्हिकम् ।
" " षष्ठ आन्हिकम् ।
इति पूजाविधानंनाम सप्तमान्हिकम् ।
इति भोजनविधानंनाम अष्टमान्हिकम् ।
" " नवमान्हिकम् ।
इति पवित्राधिवासनं नाम दशान्हिकम् ।
इति पवित्रकविधिर्नाम एकादशान्हिकम् ।
इति दमनकाधिवासनं नाम द्वादशान्हिकम् ।
इति समयदीक्षानामत्रयोदशान्हिकम् ।
इति विशेषदीक्षानाम चतुर्दशान्हिकम् ।

इति श्रीनिर्वाणदीक्षाधिवासनंनाम पञ्चदशाह्निकम् ।
इति श्रीनिर्वाणदीक्षानाम षोडशान्हिकम् ।
इति श्रीनिर्वाणदीक्षाभेदोनाम सप्तदशान्हिकम ।
इति श्रीआचार्याभिषेकोनामाष्टादशान्हिकम् ।
इति श्रीसाधकाभिषेको नामैकोनविंशतितमान्हिकम ।
इति श्रीदीक्षोद्धारोनाम विंशति तमान्हिकम् ।
" " एकविंशतितमान्हिकम ।
इति श्रीश्राद्धविधिर्नाम द्वाविंशतितमान्हिम् ।
इति श्रीशिवाष्टकं नाम त्रयोविंशतितमान्हिकम् ।
इति श्रीप्रतिष्ठाधिवासनं नाम चतुर्विंशतितमान्हिकम् ।
इति श्रीप्रतिष्ठाविधिर्नाम पञ्चविंशतितमान्किम ।
इति श्रीध्वजप्रासादप्रतिष्ठानाम षड्विंशतितमान्हिकम् ।
इति श्रीविष्णुप्रतिष्ठानाम सप्तविंशतितमान्हिकम् ।
इति श्रीगृहप्रतिष्ठानामा(ष्टाविंशतितमान्हिकम् ।
इति एकोनत्रिंशान्हिकम् ।

प्रासाददीपिका मन्त्रटीकासहिता



क्रमाङ्कः प्र. १४५६ विषयाङ्कः

ग्रन्थकारः ··· ··· ···· । नेपालीयं कागतम् । पङ्क्तयः ७ । आकारः १३½×३½ ।
ग्रन्थसंख्या २६०० । पत्रसंख्या ११४ । २८ आन्हिकान्तम पूर्णाम् ।

फेत्कारिणीतन्त्रम्



क्रमाङ्कः प्र. २०१ विषयाङ्कः

ग्रन्थकारः भैरवाचार्यः । नेपालीयं कागतम् । नेवारी लिपिः । पङ्क्तयः ६ ।
आकारः८[illegible]×२[illegible] । ग्रन्थसंख्या १४०० । पत्रसंख्या ११७ ।

आदिवाक्यम्:--

ॐ नमः परदेवतायै ॥ क्रोधाज्ज्वलन्तीं ज्वलनं रमन्तीं दृष्टिर्दहन्ति दितिजंस- न्तीम् । भीमं नदन्तीं प्रणमामि हृद्यां रोरूयमानां क्षुधयोग्रकालीम् । उन्मत्तभैरवं नारसिंहं डामरभैरवं । शिवारा वजाकायमसिताङ्गादियामलम् ॥ सिद्धयोगेश्वरीतन्त्रं योगिनी जालसम्बरम् । दृष्ट्वा कृत्यविधंकं ... ... वीरतन्त्रं विरि(र)च्यते ॥ पञ्चाशद्वर्णरूपात्मा मातृका परमेश्वरी । अतोत्पन्ना निगद्यन्ते प्रत्येकं शिवशक्तयः । न्यासाः एता काला सर्वापञ्चाशत्सर्वसिद्धये । एभ्य एव समुत्पन्नाः सब्रह्माविष्णुशूलिनः । मूर्तयः शक्ति संयुक्ता उच्यन्ते ताः क्रमेणतु । प्रथमः केशवः प्रोक्तस्ततो नारायाणो मतः । माधवोप्यथ गोविन्दो विष्णुश्च मधुसूदनः ॥ त्रिविक्रमस्तथाख्यातो वामनः श्रीधरस्तथा ॥

पुष्पिका वाक्यानिः--

इति फेत्कारिणितन्त्रेमन्त्रकोशे प्रथमः पटलः ।
" " द्वितीयः पटलः ।
" स्त्रुकुस्त्रुवस्तृतीयः पटलः
" मन्त्रकोषे साधारणश्चतुर्थः पटलः ।
" चरणायुधः पञ्चमः पटलः ।
" शिवदीक्षान्तर्गतः सिद्धिलक्ष्मीमते पश्चिमाम्नाये उच्छिष्टचाण्डाली षष्ठः पटलः ।
" " धूमावती सप्तमः पटलः ।
" " गृध्रकर्णी अष्टमः पटलः ।
" " रुद्रकाली पटलः ।
" " श्मशानकालिका पटलः ।
" महाकालिमन्त्रत्रयपटलः ।
" हरगौरीसंवादे एकजटापटलः ।
" महाकृत्या विमलः पटलः ।
" जयदुर्गागृध्रगणपरिवृता ज्वालामुखी पटलः ।
" जातवेदसि नवदुर्गापटलः ।
" लवनमन्त्रपटलः ।
" सिद्धयन्त्रपटलः ।
" भूतलिपिप्राणप्रतिष्ठापटलः ।
" जननादिसंस्कारःपटलः ।
" ऋणधनविचारपटलः ।

इति श्रीभैरवाचार्यविरचितं फैत्कारिणीतन्त्रं सम्पूर्णम् ।
समयः— सम्वत् ७२८ थ्व दं श्री ३ भवानीशङ्करप्रीतिन श्रीकालि दासन दयका जुरो ॥ उमेश प्रीतये पुस्तं कालिदासेन संचितम् ।
अनेन पण्य योगेन तयोरन्ते (ज) योस्तुमे ॥


फेत्कारिणीतन्त्रम्



क्रमाङ्कः प्र. ७१ विषयाङ्कः

ग्रन्थकारः— भैरवाचार्यः । नेपालीयं कागतम् । देवनागरी लिपिः । पङ्क्तयः ११ । आकारः १५$\frac{5}{6}$×५$\frac{5}{6}$ । ग्रन्थसंख्या १२०० । पत्रसंख्या ४१ । चेटिकासाधनपटलान्तम् ।

फेत्कारिणीतन्त्रम्



क्रमाङ्कः प्र. १५५ विषयाङ्कः

ग्रन्थकारः भैरवाचार्यः । नेपालीयं कागतम् । देवनागरी लिपिः । पङ्क्तयः ७ । आकारः ११$\frac{1}{2}$×३$\frac{3}{4}$ । ग्रन्थसंख्या १२०० । पत्रसंख्या ७० । समयः १६५५ । चेटिका साधन पटलान्तम् ।

फेत्कारिणीतन्त्रम्



क्रमाङ्कः प्र. १७४ विषयाङ्कः

ग्रन्थकारः भैरवाचार्यः । नेपालीयं कागतम् । नेवारीलिपिः । पङ्क्तयः ६ । आकारः ४$\frac{3}{4}$×१४$\frac{3}{4}$ । ग्रन्थसंख्या १२०० । पत्रसंख्या ६० ।

फेत्कारिणीतन्त्रम्



विषयाङ्कः

क्रमाङ्कः प्र. २७

ग्रन्थकारः भैरवाचार्यः । नेपालीयं कागतम् । नेवारी लिपिः । पङ्क्तयः ७ । आकारः ११½×३ । ग्रन्थसंख्या १३०० । पत्रसंख्या ७० । चेटिकासाधनपटलान्तम् ।

बालतन्त्रम्

कृत्यचिन्तामण्यन्तर्गतम्



विषयाङ्कः

क्रमाङ्कः च. ३३५

ग्रन्थकारः ... ... । नेपालीयं कागतम् । देवनागरी लिपिः । पङ्क्तयः ६ । आकारः १०¼×३¼ । ग्रन्थसंख्या १२० । पत्रसंख्या ११ ।

आरम्भावाक्यम्—

श्री गणेशाय नमः । उद्विग्नचित्तपरिखेदितवित्तनाश क्लेशप्रवासरुजपीडितपक्षवासः ॥ संक्षोभितः स्वजनबन्धुवियोगःदुखैर्भानोर्दशा भवति कष्टकरो नराणाम् । सौख्यंविमुलिवरवाहनयारक्षत्रम् । इति बालतन्त्र प्रकाशः

बालातन्त्रम्

नेपाली भाषासहितम्


विषयाङ्कः

क्रमाङ्कः प्र० १५६

ग्रन्थकारः । नेवालीयं कागतम् । नेवारीलिपिः । पङ्क्तयः ११-१२ । आकारः

१३×५१ ग्रन्थसंख्या ४०० । पत्रसंख्या १४ । अतिविकलम् ।

बीजकोशः



क्रमाङ्कः प्र. ४६२ विषयाङ्कः

ग्रन्थकारः ... ... । नेपालीयं कागतम् । नेवारी लिपिः । पङ्क्तयः १० । आकारः ८३ × ४ । ग्रन्थसंख्या ६० । पत्रसंख्या १४ ।

असमाप्तः—

आदिवाक्यम्:-

ॐ नमः परदेवतायै । ॐ ऐँ वाग्भव । ह्रीँ माया । श्रीँ लक्ष्मीम् । क्लीँ काम आपाश ।

अन्तिमं वाक्यम्:-

विष्णुक्रान्तः । सूर्यक्रान्तः । गजक्रान्तः । वलसित ।

बीजकोशः



क्रमाङ्कः-त. ७ विषयाङ्कः

ग्रन्थकारः शङ्कराचार्यः । मध्यदेशीयं कागतम् । देवनागरी लिपिः । पङ्क्तयः ५ । आकारः ६३×४३ । ग्रन्थसंख्या ५० । पत्रसंख्या ५ ।

बीजोपबीजकूटोपकूटसङ्ग्रहः



क्रमाङ्कः प्र. १६६ विषयाङ्कः

ग्रन्थकारः । नेपालीयं कागतम् । नेवारी लिपिः । पङ्क्तयोऽनियताः ७ । आकारः १४१×४३ । ग्रन्थसंख्या । पत्रसंख्या १६ ।

बीजोपबीजकूटमन्त्रसंग्रहः



क्रमाङ्कः प्र. २७४ विषयाङ्कः

ग्रन्थकारः । नेपालीयं कागतम् । नेवारी लिपि. । पङ्क्तयोऽनियता । आकारः ६$\frac{3}{4}$×१४$\frac{1}{2}$ । ग्रन्थसंख्याऽनियता । पत्रसंख्या २३ ।

बीजोपबीजकूटमन्त्रसंग्रहः



क्रमाङ्कः प्र. २७४ विषयाङ्कः

ग्रन्थकारः । नेपालीयं कागतम् । नेवारी लिपिः । पङ्क्तयः ५ । आकारः ११$\frac{3}{8}$×४$\frac{3}{8}$ । ग्रन्थसंख्याऽनियता । पत्रसंख्या २४ ।

बीजोपबीजकूटमन्त्रसंग्रहः



क्रमाङ्कः प्र. २७४ विषयाङ्कः

ग्रन्थकारः । नेपालीयं कागतम् । नेवारी लिपिः । पङ्क्तयः ८ । आकारः ६$\frac{5}{8}$×४ । ग्रन्थसंख्याऽनियता । पत्रसंख्या ४० ।

ब्रह्मयामलम्



क्रमाङ्कः तृ. ३७० विषयाङ्कः

ग्रन्थकारः । ताडपत्राणि । प्राचीननेवारी लिपिः । पङ्क्तयः ५ । आकारः २१×१$\frac{1}{3}$ । ग्रन्थसंख्या १२००० । पत्रसंख्या ३५१ । मध्यखण्डितम् ।

आदिवाक्यम्:—

ॐ नमः शिवादिव्योगुरुभ्यः । योगीश्वरीणा। यत्तत्वं मन्त्रगर्भं सकलशिवमयं हेतु निर्वाणविश्वं दूतीनां पद्मखण्डे समसुखविलसल्लिङ्गरूपं बिभर्ति । नानाभोगाधिवासैर्विविधनयपदैः शक्तिराबद्धकाण्डे तत्तत्वं विश्वगर्भं भवमगदलनं भैरवं वः पुनातु ॥ श्रुत्वा शास्त्रं पुरा-देवी मूलतन्त्र महोदयः ॥ मुद्रामण्डलमन्त्रौघं विद्यापीठोपलक्षितम ॥ सहस्राणिदशद्वे च चतुः पीठं तु भैरवः ॥ विमला निर्गतयस्तदघोरी भीमविक्रमा । प्रत्युवाच महादेवं भैरवं तन्त्र विग्रहम । यत्पुरा सूचितं देव तन्त्राणि सूक्ष्मसंभवम् ॥ विमलाद्धेति यत्प्रोक्तस्तेनाद्यं शक्तिपूर्वकम । यस्मिंस्तु संस्थितद्येतच्चतुः पीठनस्तु भैरवः । यस्माद्विनिर्गत तत्सर्वं मन्त्र पीठं महोदयम् ॥ चतुः पीठस्य सम्बन्धे यत्तया चोदितोममः । तन्त्रावतारं संयुक्त-माद्य यत्सिद्धिकारणम् ॥ सरहस्यं समाचक्ष्व ज्ञानाद्याचारपूजितः । शिवशक्तिविभेदश्च बिन्दुभेदस्तथैव च ॥ नवशक्तिविभेदश्च सृष्टिभेदं सुविस्तरम् । एकाकिणी यथा शक्ति-र्नवभेदैर्व्यवस्थिताः । गुह्यकाकिङ्करीभिश्च किङ्कर्याच्छुक्ष्मसम्भवम् ॥ योगिन्यो लाकिनी नान्तु बहुभेदैर्व्यवस्थिताः । एका एव महावीर्या व्यापिनी शक्तिचोत्तमा । तस्य योगमशेषन्तु क्रियते सुरपूजितः ॥ यथा तथा महादेव योगिनी सिद्धिकां-क्षिणाम ॥

पुष्पिका वाक्यानिः—

इति महाभैरवतन्त्रे द्वादशसाहस्रके पिचुमते नवाक्षरविधाने सम्बन्धःपटलः प्रथमः।
" मूलतन्त्रे " मन्त्रोद्धारपटलः द्वितीयः ।
" " महायोगपटलः तृतीयः ।
" " प्रतिमालक्षणपटलः चतुर्थः ।
" " यन्त्रकर्मपटलः पञ्चमः ।
" प्रतिमालक्षणोनामपटलः षष्टः ।
" " नवमःपटलः (सप्तमः)
" " समाधियोजनेपटलः अष्टमः ।
" " लक्षभेदापटल नवमः ।
" " देवीनां मन्त्रोद्धारः पटलः दशमः ।
" " मन्त्रोद्धारः पटलः एकादशः ।
" " त्रितत्वयोगःपटलः द्वादशः ।
" " नवयोगः पटलः त्रयोदशः ।
" " खेचरीचक्रपटलश्चतुर्दशः ।
" " चन्द्रोद्धार एकोनपञ्चाशत्तमः पटलः ।
" " अष्टककल्पं (क्रोष्टक) पटलः पञ्चाशत्तमः ।

” ” अष्टककल्पपटलः एकपञ्चाशत्तमः ।
(?) द्विपञ्चाशत्तमः ।
” ” योगिनीभेदयोगः पटलः एकपञ्चाशत्तमः ।
” ” मुद्रापीठाधिकारपटलः द्विपञ्चाशत्तमः ।
” ” (?) अधिकारः पटलस्त्रिपञ्चाशत्तमः ।
” ” ” पटलश्चतुः पञ्चाशत्तमः ।
” ” ” पटलः पञ्चपञ्चाशत्तमः ।
” ” कुलचर्याविभागपटलः षट्पञ्चाशत्तमः ।
” ” ” सप्तपञ्चाशत्तमः पटलः ।
” ” ” अष्टपञ्चाशत्तमः पटलः ।
” ” सूत्राधिकारपटलः एकोनषष्टितमः पटलः ।
” ” कङ्कालभैरवाधिकारोनामः षष्टितमः पटलः ।
” ” सुखामित्रकिङ्कराधिकारोनामः एकषष्टितमः पटलः
” ” महाभैरवे यक्षिणिसाधनपटलः द्विषष्टितमः ।
” ” गुटिकाशोधनाधिकारस्त्रिषष्टितमः पटलः ।
” ” ” चतुः षष्टितमः पटलः ।
” ” ” पञ्चषष्ठितमः पटलः ।
” ” अञ्जनयोगोनाम षट्षष्टितमः पटलः ।
” ” गर्भयोगसप्तषष्टितमः ।
” ” औषधीपर्यायअष्टषष्टितमः पटलः ।
” ” पिचुभेद एकोनसप्ततितमः पटलः ।
” ” शक्तियागकल्पः सप्ततितमः पटलः ।
” ” छोमाधिकारोनाम एकसप्ततितमः पटलः ।
” ” ” द्विसप्ततितमः पटलः ।
” ” ” त्रिसप्ततितमः पटलः ।
” ” हेरम्भभैरवोनामश्चतुसप्ततितमः पटलः ।
” ” महामर्दकभैरवोनामः पञ्चसप्ततितमः पटलः ।
” ” योगिनीपृथकयोगविधिः षट्सप्ततितमः पटलः ।
” ” सप्तसप्ततितमः पटलः ।
” ” कपालखट्वाङ्गोत्पतिरशीतितमः पटलः ।
” ” कञ्चुकिसाधन एकाशीतितमः पटलः ।
” ” उत्फुल्लकाधिकारोनाम द्वाशीतितमः पटलः ।
” ” शक्तित्रयविधानोनाम त्र्यशीतितमः पटलः ।
” ” एकोननवतितमः पटलः ।

इति भैरवस्रोतसि महातन्त्रे विद्यापीठेब्रह्मयामले नवाक्षरविधाने पिचुमते द्वादशसहस्र्
एकोत्तरशतितम पट ।

संवत् (अन्चूर) सम्वत् १७२ माघशुक्लाष्टम्यां आदित्यदिने राजाधिराजपरमे
श्रीबलदेवराज्ये श्रीपशुपतिवास्तव्ये जपाकरजीवेन ब्रह्मयामल नाम शास्त्रं म

ब्रह्मयामलम्



क्रमाङ्कः प्र. २६६

ग्रन्थकारः । नेपालीयं कागतम् । नेवारी लिपिः । पङ्क्तयः १२ । आकारः १६⁵×४
ग्रन्थसंख्या ११००० । पत्रसंख्या २५७ । मध्यखण्डितम् । १०१ पटलान्तम् ।


ब्रम्हायामलम्



क्रमाङ्कः प्र. ११६० विषयाङ्कः

ग्रन्थकारः— भैरवाचार्यः । नेपालीयं कागतम् । देवनागरी लिपिः । पङ्क्तयः ६ । आकारः १३×३ १/२ । ग्रन्थसंख्या ५० । पत्रसंख्या ४ ।


ब्रह्मयामलम्



क्रमाङ्कः प्र. १५५७ विषयाङ्कः

ग्रन्थकारः । नेपालीयं कागतम । नेवारी लिपिः । पङ्क्तयः ११ । आकारः १४ १/२ × ३ ३/४ । ग्रन्थसंख्या ६० । पत्रसंख्या २१ ।

ब्रह्मयामलम्



क्रमाङ्कः प्र. १४३ विषयाङ्कः

ग्रन्थकारः । नेपालीयं कागतम् । देवनागरी लिपिः । पङ्क्तयः ११ । आकारः १३×६ ५/८ ग्रन्थसंख्या १२००० । पत्रसंख्या ४३६ । मध्यखण्डितम् ।

भार्गवार्चनदीपिका



क्रमाङ्कः प्र० १६७४ विषयाङ्कः

गृन्थकारः प्रतापराजः । मध्यदेशीयं कागतम् । मैथिली लिपिः । पङ्क्तयः १२ । आकारः ११×४ ५/६ । गृन्थसंख्या १००० । पत्रसंख्या ४१ । आदिमध्यान्त खण्डिता ।

भावचूडामणिः



क्रमाङ्कः प्र. २१२ विषयाङ्कः

ग्रन्थकारः ... ... । नेपालीयं कागतम् । नेवारी लिपिः । पङ्क्तयः ६ । आकारः १०$\frac{3}{8}$ × ४$\frac{5}{8}$ । ग्रन्थसंख्या २०० । पत्रसंख्या २२ ।

आदिवाक्यम्:--

श्रीगणेशाय नमः । ॐ नमः श्रीनाथदेवाय । भैरव उवाच । मातर्देवी महामाये बन्धमोक्ष प्रवर्तनि । इदानीं श्रोतुमिच्छामि गुरुक्रममनुत्तमम् । देव्युवाच । गुरुक्रमस्तु बहुधा मन्त्र-विस्तरगौरवात् । कालानामप्यनादित्वात्कथं तत्कथयामिते । नज्ञात्वा गुरुकुलं देव नष्टमार्गो भविष्यति । नष्टमार्गान्मन्त्रविद्येन तादृकसिद्धगोचरे । गुरूणां शिष्यभूतानां नास्ति चेत्सन्ततिक्रमः । तत्त मन्त्राश्च विद्याश्च निस्फला नात्र शंसय ॥

पुष्पिकावाक्यानि—

इति तन्त्रचूडामण्यन्तर्गत भावचूडामणौ गुरुक्रमः प्रथमः पटलः ।
इति तन्त्रचूडामण्यन्तर्गत भावचूडमणौ भावनिर्णयपटलः समाप्तश्चाग्रन्थः ।

भुवनेश्वरीतन्त्रम्



क्रमाङ्कः प्र. ३१५ विषयाङ्कः

ग्रन्थकारः । नेपालीयं कागतम् । देवनागरी लिपिः । पङ्क्तयः १० । आकारः १४×६ । ग्रन्थसंख्या २८०० । पत्रसंख्या १३७ ।

आदिमवाक्यम्—

ॐ नमो गणेशाय नमः । कैलाशशिखरे रम्ये नानारत्नोपशोभिते । वक्ष्यस्थले सुखासीना पृच्छतिस्म नगात्मजा ॥ श्री देव्युवाच । गणेशस्कन्दविष्णवादि देवतापरिवन्दितः ।

देवदेव जगन्नाथ सर्वज्ञ सकलेश्वर । कथमीशान सर्वज्ञमलभंस्ते तपोधनाः । कामाराध्य महादेव विद्यं त्रैलोक्यपूजित । भुक्तिमुक्तिप्रदा नृणां कोविद्या कथयस्व मे । श्रुत्वानगात्मजा वाक्यं प्राह तुष्टोमहेश्वरः । श्रीईश्वर उवाच । साधु साधु महेशानि यत्पृष्टोहं त्वयानघे। कथयामि वारारोहि महाविद्यां सुरेश्वरी । हृदिलेखेव जागर्ति हृल्लेखा परमेश्वरी । आद्याख्या भुवनेशानी देवी श्रीभुवनेश्वरी ॥ एतां विद्यां जगद्धात्री त्रैलोक्यवशकारिणी ॥ जिह्वायां वर्तते यस्य सतु साक्षात्सदाशिवः ॥

पुष्पिकावाक्यानि—

इति श्रीभुवनेश्वरीतन्त्रे गुरुशिष्यनिर्णयोनामः प्रथमः पटलः ।
चक्रादिनिर्णयो नामः द्वितीयः पटलः ।
दीक्षाकालविनिर्णयो नामः तृतीयः पटलः ।
सर्वतोभद्रमण्डलंनाम चतुर्थः पटलः ।
पञ्चमः पटलः ।
षष्ठः पटलः ।
सप्तमः पटल ।
वास्तुयागविधिरष्टमः पटलः ।
होमविधिर्नाम नवमः पटलः ।
कुण्डमण्डपविधानं नामैकादशः पटलः ।
„ „ दीक्षाविधौ द्वादशः पटलः ।
„ दीक्षाभेदादिकथनं नाम त्रयोदशः पटलः ।
„ मन्त्रकथनंनाम चतुर्दशः पटलः ।
„ प्रातः कृत्यविधिर्नामः पञ्चदशः पटलः ।
„ „ षोडशः पटलः ।
„ न्यासविधिर्नाम सप्तदशः पटलः ।
„ यन्त्रभेदकथनं नामाष्टादशः पटलः ।
„ „ एकोनविंशतितमः पटलः ।
„ „ पञ्चशुद्धिर्नाम विंशतितमः पटलः ।
„ मुद्राविवरणं नामैकविंशतितमः पटलः ।
„ द्वाविंशतितमः पटलः ।
„ पूजाविधिर्नाम त्रयोविंशतितमः पटलः ।
„ रत्नपूजाविधानंनाम चतुर्विंशतितमः पटलः ।
„ दमनारोहणंनाम पञ्चविंशतितमः पटलः ।

अन्तिमवाक्यम्-

अङ्गरक्ष नकर्तव्या नसाध्यं गुरुणा सह । उक्ता उक्तेपु कार्येषु उत्पे ... ...
(अतः परं खण्डितम् । समयः सम्वत् ९६२ मिति भाद्रशुदि २ रोज ३ ॥

भुवनेश्वरीतन्त्रम्



क्रमाङ्कः तृ, ५७५ — विषयाङ्कः

ग्रन्थकारः । नेपालीयं कागतम् । नेवारी तथा देवनागरी लिपिः । पङ्क्तयः १० । आकारः १०३×४३ । ग्रन्थसंख्या ३६९६ । पत्रसंख्या १५४ । अपूर्णम् ।

भुवनेश्वरी तथा त्रिपुरसुन्दरीमन्त्रम्



क्रमाङ्कः तृ. ७८ विषयाङ्कः

ग्रन्थकारः । मध्यदेशीयं कागतम् । देवनागरी लिपिः । पङ्क्तयः १२ । आकारः १०$\frac{?}{?}$×४$\frac{?}{?}$ । ग्रन्थसंख्या १०८ । पत्रसंख्या ४ । पूर्णम् ।

भूतडामरतन्त्रम्

सुन्दरीसिद्धसाधनादियक्षसिद्धिसाधनान्तम्



क्रमाङ्कः तृ. ५०५ विषयाङ्कः

ग्रन्थकारः । नेपालीयं कागतम् । नेवारी लिपिः । पङ्क्तयः ७-८। आकारः ११×३ । ग्रन्थसंख्या ८४० । पत्रसंख्या ३४ ।

आदिवाक्यम्:--

ॐ नमो श्रीगुरवे । क्रोधाधिपं नमस्कृत्य व्योमवक्रं सुरान्तकम् । अभेद्यभेदकं स्तौमि भूतडामरनामकम् ॥ त्रैलोक्याधिपतिं चैव सुरलोक नमस्कृतम् । उन्मत्तभैरव नत्वा पृच्छत्युन्मत्तभैरवीम् । उन्मन्तभैरव्युवाच ॥ कथं यक्षाप्सरोनागाः किन्नरा प्रमथा-दयः । जम्बूद्वीपे कलौ सिद्धिं यदिच्छेद्वा वराङ्गना । येस्तु पापरता मिथ्यावादिन शीलवर्जिता ॥ दाम्भिका ये नरा स्तेभ्य साहायं कुरु '' ''' '''नि । केनोपायेन नश्यन्ति कलौदुष्टाग्रराशयः । लभ्यन्तेसिद्धयः सर्वा मोक्षपद्धतयः शुभा । सिद्धयोप्यणिमाद्योश्च महापा तकराशयः अन्यनाशनतः पापमन्यस्त्रीं गमनादिकम् । कथं नश्यन्तिदेवेश हेलया नारकं तमः । चन्द्रसूर्यप्रभो भूत्वा स्थितं रुद्रपुरे चिरम् । सुराः सिद्धानागभूतयक्ष गुह्यकनायिका ॥ हठादागत्य कामार्ता वलादालिंगयन्तितत्र । ब्रह्मेशशक्रप्रमुखा कथं स्युर्भाविता प्रभो ॥

पुष्पिकावाक्यानि—

इति श्रीभूतडामरे महातन्त्रराजे पटलः । प्रथमः
" " द्वितीयः पटलः ।
" सुन्दरीसिद्धिसाधनस्तृतीयः पटलः ।
" पिशाचिनीचेटिकासाधनश्चतुर्थः पटलः
" कात्यायनीसाधनः पञ्चमः पटलः ।
" प्रमथाधिपक्रोधसिद्धिसाधनं षष्ठः पटलः ।
" किन्नरीसिद्धिसाधनः सप्तमः पटलः ।
" चेटिकासाधनविधिरष्टमः पटलः ।
" भूतिनीसाधनविधिर्नवमः पटलः ।
" अप्सरससाधनविधिर्दशमः पटलः ।
" यक्षिणिसाधनविधिरेकादशः पटलः ।
" नागराज्ञीसाधकसिद्धिर्द्वादशः पटलः ।
" किन्नरीसिद्धिसाधनविधिस्त्रयोदशः पटलः ।
" परिषण्मण्डलक्रोधराजविधिश्चतुर्दशः पटलः ।
" यक्षसिद्धिसाधनविधिः पञ्चदशः पटलः

समाप्तश्चायं ग्रन्थः


भूतड़ामरतन्त्रम्



क्रमाङ्कः छि. ८६ विषयाङ्कः

ग्रन्थकारः । मध्यदेशीयं कागतम् । देवनागरी लिपि. । पङ्क्तयः १२ । आकारः ११×४$\frac{1}{2}$ । ग्रन्थसंख्या ७०० । पत्रसंख्या २२ । १५ पटलान्तं पूर्णम् ।

भूतडामरतन्त्रम्



क्रमाङ्कः तृ. २४६ विषयाङ्कः

ग्रन्थकारः । नेपालीयं कागतम् । देवनागरी लिपिः । पङ्क्तयः ६ । आकारः ११$\frac{1}{2}$×६ । ग्रन्थसंख्या ६०८ । पत्रसंख्या ३६ । १५ पटलान्तं पूर्णम् ।

भूतडामरतन्त्रम्



क्रमाङ्कः प्र. १४ विषयाङ्कः

ग्रन्थकारः । नेपालीयं कागतम् । नेवारी लिपिः । पङ्क्तयः ८ । आकारः १०$\frac{1}{2}$×४ ग्रन्थसंख्या ६०० । पत्रसंख्या ३७ । आदिखण्डितम् ।

भूतडामरतन्त्रम्



क्रमाङ्कः तृ. ६०५ विषयाङ्कः

ग्रन्थकारः – । नेपालीयं कागतम् । देवनागरी लिपिः । पङ्क्तयः ४ । आकारः६$\frac{1}{4}$×३$\frac{1}{4}$ । ग्रन्थसंख्या ६६० । पत्रसंख्या १५ । पूर्णम् ।

भूतड़ामरतन्त्रम्



क्रमाङ्क प्र० १५७२ विषयाङ्कः

ग्रन्थकारः । मध्यदेशीयं कागतम् । मैथिली लिपिः । पङ्क्तयः १२ । आकारः१२¾×४½ । ग्रन्थसंख्या ७८० । पत्रसंख्या २० । १५ पटलान्तं पूर्णम् ।

भूतभैरवतन्त्रम्

महाकालसंहितायाछिन्नाखण्डान्तर्गतम्



क्रमाङ्कः तृ. २५१ विषयाङ्कः

ग्रन्थकारः आदिनाथः । नेपालीयं कागतम् । देवनागरी लिपिः । पङ्क्तयः ६ । आकारः १२×५ । ग्रन्थसंख्या १६० । पत्रसंख्या १२ । पूर्णम् । लेखन सं. १८८१

आदिवाक्यम्—

६ श्रीगणेशाय नमः । वह्निवमन्तमीडेव्योममुखं दुर्निरीक्ष्यमिति दीप्त्या । विबुधाहि यक्षकिन्नरभूतांन्तकमीश्वरमनादिम् । मन्त्राशेषविशेषज्ञानं यद्गोपितं सुरैर्यत्नात् ॥ क्रोधीश भैरवोहं तद्वक्ष्ये भूतभैरवं नाम । यज्ज्ञानेन विना नसंजपहोमाद्यं प्रयोगबलि-दानम् । षट्कर्माण्यनघत्वं मोक्षज्ञानंसमाध्यानम् । कष्टेन वीरसिद्धियागादि र भोजनेन नसुरभक्तिः ॥ इन्द्रियमनोविशुद्धिर्मनोस्तदास्यादिकं वक्ष्ये ।

अन्त्यवाक्यम्—

इति परमरुद्रावतारः श्रीमदादिनाथोन्तभैरव श्रीक्रोधीशभैरवविरचितायां महाका-लसंहितायां छिन्नाखण्डे एकार्थमनुकोशे भूतभैरवं नाम महातन्त्रंसम्पूर्णम् ॥

शुभमस्तु ॥ संवत् १८८१ ॥ मार्गशीर्षशुदी द्वितीयायां ... शनौ चन्द्रा घता लगर्या प्रव भूलालेन लिखितम् । शुभं भूयात् ॥

मण्डूकयन्त्रम्

(भाषा)

क्रमाङ्क तृ. ६० विषयाङ्कः

ग्रन्थकारः । नेपालीयं कागतम् । देवनागरी लिपिः । पङ्क्तयः ५ । आकारः ८$\frac{५}{६}$×३$\frac{५}{८}$। ग्रन्थसंख्या १५ । पत्रसंख्या २ । पूर्णम् ।

मतङ्गपारमेश्वरतन्त्रम्



क्रमाङ्कः छि १७१ विषयाङ्कः

ग्रन्थकारः । नेपालीयं कागतम् । देवनागरी लिपिः। पङ्क्तयः ६ । आकार १४$\frac{३}{४}$×६$\frac{३}{४}$ः। ग्रन्थसंख्या ३४०० । पत्रसंख्या १५३ । अपूर्णम् ।

आदिवाक्यम्

ॐ नमः शिवाय । अभिप्रेतार्थसिद्ध्यर्थं पूजितोयः सुरैरपि । सर्वविघ्नछिदे तस्मै गणाधिपतये नमः ॥१॥ हिमवत्यचलेरम्ये सिद्धचारणसेविते ।' नानाश्चर्यगुणैर्युक्ते ... ...कनिर्मिते सिद्धिनामुद्भवो यत्र यत्र नास्त्युपसर्गता । यत्रान्योविरुद्धानां प्रीतिर्भवति तत्क्षणात् । मुर्खोप्य मूर्खतां याति भयादप्यधिमुच्यते ॥ यत्र नास्त्युपसर्गाणां प्रवेश शिखरोत्तम ॥ यत्र सन्निहितो नित्यं भगवान् परमेश्वरः ॥ तत्रा सौ मुनिशार्दूलस्तपसोत्कृष्टमूर्तिमान् ॥ ज्ञानाग्निदग्धकलुषो व्रताम्भः क्षालितात्मवान् ॥ शिवध्यानैकचित्तात्मा समाधानस्थित सुधी ॥ यावत्मारुतसंपर्कान्मुमोचमधुरस्वरम् । ... ... यावन्मतङ्गस्य- सहसा क्षुभितं मन ॥ भूयो भूयो निनादेन श्रोत्रामृतवपुष्मता ॥ करिण्यारण्यमातङ्गस ... ... । ततश्चासौ मुनी श्रीमान् ज्ञात्वा तुष्टमना शिवात् ।

पुष्पिकावाक्यानि—

इति श्रीमतङ्गपारमेश्वरे महातन्त्रे उपोद्घातः पटलः प्रथमः ॥
" " " विद्यापादसूचनपटलः (द्वितीयः)
" " " विद्यापादेतत्त्वद्वयपटलः (तृतीयः)
" " " पतिपटलः (चतुर्थः)
" " विद्यापादे शक्तिपटलः । (पञ्चमः)
" " पुंप्रधानेश्वरप्रतिपादनं पटलम् (षष्ठः)
" " " विद्यातत्त्वपटलम् (सप्तमः)
" " मायापादे मायातत्त्वं पटलम (अष्टमः)
" " " कामतत्त्वपटलम् (नवमः)
" " " विद्यातत्त्वपटलम् । (दशमः)
" " " रागपटलः (एकादशः)
" " " कालापटलः (द्वादशः)
" " " नियतिपटलः (त्रयोदशः)
" " " पुंस्तत्त्वपटलः (चतुर्दश)
" " " प्रधानपटलः । (पञ्चदशः)
" " " गुणपटलः । (षोडशः)
" " " बुद्धितत्त्वपटलः । (सप्तदशः)
" " " हकारादिसप्तदशतत्त्वपटलः । (अष्टादशः)
" " " आकाशपटलः । (एकोनविंशः)
" " " वायुपटलः । (विंशः)
" " " अग्निपटलः । (एकविंशः)
" " " तोयपटलः । (द्वाविंशः)
" " " पृथिवीपटलः । (त्रयविंशः)
" " " प्रमाणपटलः । (चतुर्विंशः)
" " " प्रलयपटलः । (पञ्चविंशः)
" " " धर्माधर्मनिर्णयपटलः (षड्विंशः)
" " क्रियापादे दीक्षाङ्गपटलः । (सप्तविंशः)
" " " स्नानपटलः । (अष्टाविंशः)
" " " अर्चनपटलः । (एकोनत्रिंशत्)
" " " अग्निकार्यपटलः । (त्रिंशत्)
" " " अधिवासनपटलः (एकत्रिंशत्)

" " " स्वप्नपटलम् । (द्वात्रिंशत्)
" " " भुवनदीक्षापटलम् । (त्रयत्रिंशत्)
" " " तत्वदीक्षापटलम् । (चतुस्त्रिंशत्)
" " " दीक्षापटलम । (पञ्चत्रिंशत्)
" " " अभिषेकपटलम् । (षड्त्रिंशत्)
" " उत्तमसिद्धिफलपटलम् । (सप्तत्रिंशत्)
" " " कर्मपटलम् । (अष्टात्रिंशत्)
" " " लिङ्गस्थानपटलम् । (एकोनचत्वारिंशत्)
" " " प्रतिमालक्षणपटलम् । (चत्वारिंशत्)
" " " समुदायसाधनपटलम । (एकचत्वारिंशत्)
" " " योगपादेभोगोपन्यासपटलम् । (द्विचत्वारिंशत्) -
" " " गारुड़पटलम् (त्रिचत्वारिंशत्)
" " " योगसारसमुच्चयपटलम् । (चतुश्चत्वारिंशत्)
" " " तत्वसाधनपटलम् । (पञ्चचत्वारिंशत्)
" " " शिवतत्लोपलब्धिपटलम् । (षड्चत्वारिंशत्)
" " " कर्मयोगपटलम् । (सप्तचत्वारिंशत्)
" " " उपोद्घातसिद्धिपटलम् ।
" " " चर्यापादे समयानुक्रमपटलम् । एकोनपञ्चाशत्)
" " " आचारपटलम् । (पञ्चाशत्)
" " " गुरोर्वर्णनपटलम् । (एकपञ्चाशत्)
" " " समयाहिवृतपटलम् (द्विपञ्चाशत्)
" " " तृतीयविधानपटलम् । (त्रिपञ्चाशत्)
" " " शौचपटलम् । (चतुः पञ्चाशत्)
" " " भिक्षाटनपटलम् । (षड्पञ्चाशत्)
" " " प्रवासपटलम । (सप्तपञ्चाशत्)
" " " रुद्रव्रतपटलम । (अष्टपञ्चाशत्)

मन्त्रकूटोद्धारविजयः

क्रमाङ्कः प्र० १४०२ विषयाङ्कः

ग्रन्थकारः । नेपालीयं कागतम् । मैथिली लिपिः । पङ्क्तयः ६ ।
आकारः १५ × ४३ । ग्रन्थसंख्या । पत्रसंख्या १७ ।

मन्त्रकोशः
(रुद्रयामलोद्धृतः)

क्रमाङ्कः तृ० ७० | विषयाङ्कः

ग्रन्थकारः । नेपालीयं कागतम्। देवनागरी लिपिः । पङ्क्तयः ६।७ । आकारः ७½ × ३¼ । ग्रन्थसंख्या ५० । पत्रसंख्या ६ ।

श्रीगणेशाय नमः । स्वस्त्यस्तु सर्वजगतां ... ... मा भूच्च किञ्चनः । सा एव रक्षतु सदा देव देवी करंकिणीम् । ॐकार व्यापकं चैव प्रतोदं विश्वनायकम् । प्र ... ... वं मन्त्रं दीपं च सर्वात्मानं तथा परम् । त्रिपदं त्रिस्वरूपंच धामात्मा स्वात्मरूपकः ॥ ॐ ॥ अकारं व्यापकं चाद्यं सर्वात्मा व्यापका शिवः ॥ अ ॥ नारायण स्व आकारं मुखदारुणमङ्कुशम् ॥

अन्तिमवाक्यम्:—

रौद्रं कालानलप्रख्यं भीषणं च करालिनम् । संहाररूपिणं चोग्र क्षकार परिपठ्यते ॥ इति श्रीरुद्रयामले मन्त्रकोशं समाप्तम् ॥
श्री शाके १६०७ आश्विनमासे तिथौ १ वासरे ७ जयकृतसिंहेन श्रीश्रीस्वधामोप्रीति कामनया लिखितम् ॥

मन्त्रकोशः

क्रमाङ्कः द्वि १६० | विषयाङ्कः

ग्रन्थकारः । नेपालीयं कागतम् । देवनागरी लिपिः । पङ्क्तयः ७ । आकारः १४⅗×६⅝ । ग्रन्थसंख्या ७७ पत्रसंख्या ६ ।

मन्त्रकोशः
(महाकालसंहितोक्तः)

क्रमाङ्कः च | विषयाङ्कः

ग्रन्थकारः .. । नेपालीयं कागतम् । देवनागरी लिपि । पङ्क्तयः १० । आकारः १३⅗ × ६ । ग्रन्थसंख्या । पत्रसंख्या ४० । मध्यखण्डितः

मन्त्रचन्द्रिका

क्रमाङ्कः प्र,५७ विषयाङ्कः

ग्रन्थकारः । नेपालीयं कागजम् । देवनागरी लिपिः । पङ्क्तयः ६
आकारः १२३/६ × ५ । ग्रन्थसंख्या ६००० । पत्रसंख्या २५० ।

आदिवाक्यम्:--

श्रीगणेशाय नमः । नत्वा गुरुपदाँभोजं गणेशं सरदाँ शिवाम् । शिवं सूर्यं हृषीकेश तन्यते मन्त्रचन्द्रिकाम् ॥ ग्रन्थं ग्रन्थान्तराद्वाक्यान्नानार्थं प्रतिबुध्य च ॥ सौकर्यार्थं च संक्षेपा--त्सारं सारः प्रतन्यते ॥ वन्देहं सकलां स्वेष्टां परमात्मस्वरुपिणीम् । यस्या कटाक्षमात्रेण साधकः किन्न साधयेत् ॥ उच्यते प्रथमं तन्त्रं लक्षणं गुरुशिष्ययोः ॥ वितण्डेश्वरे ॥ शान्तो दान्तः कुलीनश्च विनीतः शुद्धवेषवान् । शुद्धाचारः सुप्रतिष्ठः शुचिर्दक्षः सुबुद्धिमान ॥ आश्रमी ध्याननिष्ठश्च यन्त्रतन्त्रविशारदः । निग्रहानुग्रहे शक्तो गुरुरित्यभिधीयते ॥

पुष्पिकावाक्यानि:—

इति श्रीमन्त्रचन्द्रिकायां मन्त्रमेलनचक्राधिकारः प्रथमस्तरङ्गः ।
" " दीक्षाकालनिर्णयो द्वितीयस्तरङ्गः ।
" " गुरुशिष्यलक्षणाधिकारस्तृतीयस्तरङ्गः ।
" " दीक्षाधिकारश्चतुर्थस्तरङ्गः ।
" श्रीमन्त्रचन्द्रिकायां मालासंस्कारः पञ्चमस्तरङ्गः ।
" गणेशमन्त्राधिकारः षष्ठस्तरङ्गः ।
" " सूर्यमन्त्राधिकारः सप्तमस्तरङ्गः ।
" " मातृकासरस्वत्यादि मन्त्रकथनं नामाधिकारोष्टमस्तरङ्गः ।
" " भुवनेश्वर्यादिमन्त्रकथनाधिकारो नवमस्तरङ्गः ।
" " अश्वारुढादिमन्त्रकथनाधिकारो दशमस्तरङ्गः ।
" " दक्षिणकालिकादिमन्त्रकथनाधिकारः एकादशस्तरङ्गः ।
" " शैवमन्त्रकथनाधिकारो द्वादशस्तरङ्गः ।
" " वैष्णवमन्त्रकथनाधिकारस्त्रयोदशस्तरङ्गः ।
" " वैष्णवमन्त्राधिकारश्चतुर्दशस्तरङ्गः ।
" " " " पञ्चदशस्तरङ्गः ।

" " वैष्णवमन्त्रकथनाधिकारः षोडशस्तरङ्गः ।
" " वैष्णवमन्त्रादिनानामन्त्रकथनाधिकारः सप्तदशस्तरङ्गः ।
" " गायत्रीकल्पाधिकारऽष्टादशस्तरङ्गः ।
" " सन्ध्यात्रयनिरुपणाधिकारः एकोनविंशस्तरङ्गः ।
" " पञ्चायतनपूजोपकरणाधिकारो विंशस्तरङ्गः ।
" " न्यासाधिकारोद्वात्रिंशस्तरङ्गः ।
" " पुरश्चरणाधिकारस्त्रयोविंशस्तरङ्गः ।
" " दमनारोहणं पवित्रारोहणं रुद्राक्षमहात्म्यं विभूतिधारणाधिकारश्चतुर्विशस्तरङ्गः ।
मुद्राधिकार ——— ध्यायः ।
" " यन्त्रप्रकरणाधिकारः सप्तविंशस्तरङ्गः ।

श्री शाके रोज १६६५ विक्रमाब्दे १८३० चैत्रमासे कृष्णपक्षे पञ्चम्यां तिथौ विशाखा नक्षत्रे बृहस्पतिवासरे शुभलग्ने । तद्दिने दैवज्ञ कृष्णेन लिखितमिदं पुस्तकम् ।

मन्त्रचन्द्रिका

क्रमाङ्कः च १३६ — विषयाङ्कः

ग्रन्थकारः जनार्दनः । नेपालीयं कागतम् । देवनागरी लिपिः । पङ्क्तयः १२ । आकारः १०×४½ । ग्रन्थसंख्या २१०० । पत्रसंख्या ६६ । आद्यन्तखण्डिता । समयः ७४४ ।

" महागणपत्याख्यपञ्चदशः पटलः ।
" गणपत्यः षोडशपटलः ।
" अष्टाक्षरद्वादशाक्षराख्यः सप्तदश पटलः ।
" नारसिंहप्रकरणेऽष्टादशः पटलः ।
" वराहहयग्रीवव्यासाख्य एकोनविंशतितमः पटलः ।
" विंशतिः पटलः ।
" गोपालनामाख्य एकविंशतितमः पटलः ।
" वैष्णवमन्त्रप्रकरणं द्वाविंशतितमः पटलः ।
" " त्रयोविंशतितमः पटलः ।
" वागीश्वर्यादिकश्चतुर्विंशतितमः पटलः ।
" " पञ्चविंशतितमः पटलः ।
" " षड्विंशतितम पटलः ।
" " सप्तविंशतितमः पटलः ।
" " अष्टाविंशतितमः पटलः ।
" आग्नेयाख्य एकोनत्रिंशतितमः पटलः ।

मन्त्रचन्द्रिका

क्रमाङ्कः द्वि २०६ विषयाङ्कः

ग्रन्थकारः जनार्दनः। नेपालीयं कागतम् । नेवारी लिपिः पङ्क्तयः ११ । आकारः ११×४½ । ग्रन्थसंख्या ३०० । पत्रसंख्या १३ । आद्यन्तरहिता ।

मन्त्रदीपिका

क्रमाङ्कः प्र १०८ विषयाङ्कः

ग्रन्थकारः हरपतिः । नेपालीयं कागतम् । नेवारी लिपिः । पङ्क्तयः ११ । आकारः १५×४⅞ । ग्रन्थसंख्या १८०० । पत्रसंख्या ५१ । आदि खण्डितम् । समयः सम्वत् ८२४ आषाढ शुदी १३ लिखितम ।

मन्त्रदेवप्रकाशिका

क्रमाङ्कः प्र १६७५ विषयाङ्कः

ग्रन्थकारः । नेपालीयं कागतम् । देवनागरी तथा नेवारी च लिपिः । पङ्क्तयः ७ । आकारः १६⅝×४⅛ । ग्रन्थसंख्या ३५०० । पत्रसंख्या १३० ।

आदिवाक्यम्:-

श्रीगणेशाय नमः । श्री दक्षिणामूर्तये नमः । त्रिलोचनं नमस्कृत्य ब्रह्माणं विष्टरश्रवम् । पार्वतीं भारतीं लक्ष्मीं वक्ष्ये मन्त्रप्रकाशिकाम् ।

पुष्पिका वाक्यानि:-

इति श्रीमन्त्रदेवताप्रकाशिकाया ब्रह्मविद्योपदेशः प्रथमः पटलः ।
" " मन्त्रपरीक्षाख्यो द्वितीयपटलः ।
" " दीक्षोद्धारस्तृतीयः पटलः ।
" " दीक्षाविधिनाख्यश्चतुर्थः पटलः ।
" " पञ्चमः पटलः ।
" " जपादिविधानाख्यः षष्ठःपटलः ।
" " देवतापूजनाख्यः सप्तमः पटलः ।

„ „ होमविधिरष्टमः पटलः ।
„ „ अजपाप्रणवमातृकाविधानाख्यो नवमः पटलः ।
„ „ भुवनेश्वर्योपाख्यानाख्यो दशमः पटलः ।
„ „ पञ्चाक्षर्माध्येकादशः पटलः ।
„ „ दक्षिणामूर्तिविधानो द्वादशः पटलः ।
„ „ त्र्यम्बकाद्यभिधानस्त्रयोदशः पटलः ।
„ „ नीलकण्ठादिमन्त्रविवरणे नामश्चतुर्दशः पटलः ।

मन्त्रदेवताप्रकाशिका



क्रमाङ्कः प्र १६० विषयाङ्कः

ग्रन्थकारः । नेपालीयं कागतम् । नेवारी लिपिः । पङ्क्तयः ६ । आकारः १५$\frac{5}{8}$×३$\frac{5}{8}$ ।ग्रन्थसंख्या ३७०० । पत्रसंख्या ६२ । अपूर्णा ।

मन्त्रदेवप्रकाशिका



क्रमाङ्कः प्र २२१ विषयाङ्कः

ग्रन्थकारः । नेपालीयं कागतम् । देवनागरी लिपिः । पङ्क्तयः ८ । आकारः ६$\frac{1}{4}$×३$\frac{1}{4}$ । ग्रन्थसंख्या ३७०० । पत्रसंख्या २०१ । समयः १६१० । ३० पटलान्ता अपूर्णा ।

मन्त्रध्यानम्



क्रमाङ्कः प्र ४१८ विषयाङ्कः

ग्रन्थकारः ..नेपालीयं कागतम् । नेवारी लिपिः । पङ्क्य : ७ । आकारः ७$\frac{1}{4}$× ३ । ग्रन्थसंख्या १५० । पत्रसंख्या १० । अपूर्णम् ।

मन्त्रनिरूपणम्



क्रमाङ्क : तृ ७ विषयाङ्कः

ग्रन्थकार : । नेपालीयं कागतम । देवनागरी लिपिः । पङ्क्तयः ६ । आकारः १०$\frac{3}{4}$×४$\frac{3}{4}$। ग्रन्थसंख्या १०० । पत्रसंख्या १० । अपूर्णम्

मन्त्रमहोदधिःसटीकः



क्रमाङ्कः तृ ४६६ विषयाङ्कः

ग्रन्थकारः महीधरः । टीकाकारः- काशीनाथः । नेपालीयं कागतम् । देवनागरी लिपिः । पक्कयः अनियता । आकार ११×४$\frac{1}{8}$ । ग्रन्थसंख्या ६००० । पत्रसंख्या २२६

आदिवाक्याम् :—

ॐ शिवाय नमः । प्रणम्य लक्ष्मीं नृहरिं महागणपतिं गुरुम् मन्त्राण्यनेकान्यालोक्य वक्ष्ये मन्त्रमहोदधिम् । प्रातरुत्थाय शिरसि ध्यात्वा गुरुपादाम्बुजम् । आवश्यकं विनिर्वर्त्य स्नातुं यायात्सरित्तटे ॥ श्रौतेन विधिना स्नात्वा मन्त्रस्नानं समाचरेत् । स्मार्त सन्ध्यां मन्त्रसन्ध्यां कृत्वा । गृहद्वारमथागत्य द्वारपूजा समाचरेत् । द्वारमस्त्राम्बुनाप्रोक्ष्य गणेशं चोद्धतोद्वजेयत् । महालक्ष्मीं दक्षभागे वामभागे सरस्वतीम् । पुनर्दक्षे यजेद्विघ्न गङ्गां च यमुनामपि ।

टीकानाम्:—

श्रीगणेशाय नमः । श्रीदक्षिणमूर्तिगुरूभ्यो नमः । करैर्दधानः परशुं कुरङ्गं वराख्यमुद्रामुपदेशमुद्राम् । वटस्य मूलेःविविधोपसेव्यः सदा स्यास्तु सदाशिवोनः। नत्वा श्रीदक्षिण मूर्ति चरणांभोरुहद्वयम् । काशीनाथः प्रकुरूते टीकामन्त्रमहोदधेः । अथेश्वरः सर्वा अपि श्रुतिर्भवपाशवद्धानां जन्तूनां स्वर्गाय मुक्तये च समुपदिशतिस्म, अन्येषां स्मृतिशास्त्रादीनां तन्मूलकत्वेन च प्रामाण्यमपि सुप्रसिद्धतरं अस्यास्त्वागम स्मृतेः कथं तन्मूलकत्वमिति चेदुच्यते सर्वासु श्रुतिषु काण्डत्रयंकर्मोपासनब्रह्मभेदेन तत्र कर्मकाण्ड जैमिनिप्रभृतिभिः सम्यक्तया विवृतं इदन्तु उपासना काण्डं। हयग्रिवादिभिः ब्रह्मकाण्डं भगवद्व्यासादिभिरिति । श्रुतिमुल्ल- कतास्य प्रत्यक्षो पलभ्य। श्रुतिमूलकता च त्रिपुरा पूर्वोत्तरतापनीयगोपाल पूर्वोत्तर तापनीयराम पूर्वोत्तरतापनीयनृसिंह पूर्वोत्तरतापनीयशिव पूर्वोत्तर तापनीयगणेश पूर्वोत्तरतापनीय, श्रीदक्षिणमृत्युपनिषदादिसौराष्ट्रा क्षरशैवपञ्चाक्षरान्निकतिभ्य श्रुसोभ्यदुसाक्षापलभ्यत एव तत्र कर्मकाण्डे सर्वाप्यधिकारी मुमुक्षोरपि तत्त्वज्ञानपर्यन्तं स्वचित्तशुद्धयर्थं प्रत्यवाय परीहारार्थंच कर्मकरणेधिकार संभवात्तद्वदुपासनाकाण्डेऽपि । यतः साकारोपासनादत्तः स्वर्गादि बहुफलं भवति क्रमतोमुक्तिश्च । कर्मकाण्डात्तु स्वर्गादि फलं वहुतरव्ययासेन भवति ब्रह्मकाण्डात्मुक्तिरपि आदरनैरन्तर्यदीर्घकालाभ्यासाध्या, अनेकजन्म

संसिद्धस्ततो याति परां गतिमितिवचनात् । तथा च उपासकानामेवागमशास्त्रा न्मुक्तिर्गरीयसीतिसिद्धम् । प्रपञ्चसारे श्रीमच्छङ्कराचार्यः श्रीपादाः । कृते श्रुत्युक्तमार्गः स्यातत्रेतायां स्मृतसम्भवः । द्वापरेतु पुराणोक्तः कलावागमसंभवः । यामले । नवेद प्रणवं त्यक्त्वा मन्त्रो वेदसमुत्थितः । तस्माद्वेदपरोमन्त्रो दावेङ्गश्चागमः स्मृतः । अत्र आगम शब्द व्युत्पत्तिनिरुक्ता रुद्रयामले । आगत शिववक्रात्तु गतं च गिरीजा मुखे । मतं च वासुदेवेन तस्मादागम उच्यते । अथागमशास्त्र प्रशंसा यामले । ईश्वर उवाच । साधु साधु महादेवी यत्पृष्ठोहं त्वयानघे । तत्सर्वं च प्रवक्ष्यामि श्रृणुष्वैकाग्रमानसा । इदं रहस्यं परममनाख्येयं सुगोपितम् । नकस्यापि मया ख्यातं प्राणवद्रक्षितं प्रिये इदानीं तव भक्तया च कथयामि सविस्तरम् । संसारसारं सर्वस्वमितिहासपुरातनम् । इतिहासात्परं प्रोक्तं पुराणात्परतश्चैव श्रुतिस्मृत्यर्थ उच्यते । स्मृतेः परतरं भद्रे निबन्धं निर्णयात्मकम् । ततः सुक्तंशिखाचेति तापिनी तत्परोदितम् । तापिन्या अधिकं ज्ञेयं निगमादिरनन्तकम् । निगमादधिकं सत्यमागमंञ्चप्यनेकधेत्यादि अत्रचिकीर्षितस्य ग्रन्थस्य निर्विघ्यपरिसमाप्ति कामः शिष्टशिरोमणिश्रीमन्महीधरा चार्यः परब्रह्मानुसन्धानपूर्वकमिष्टदेवतानमस्काररुपं मङ्गलमाचरति ॥ प्रणम्येति ॥ लक्ष्म्या युतो नृहरिर्लक्ष्मी नृहरिः मध्यमपदलोपी समासः । अनेकार्थध्वननमञ्जर्यां हरिरिन्द्रोहरिर्भानुर्हरिर्विष्णुहरिर्मरुत् ॥ हरिः सिंहोहरिर्वाजीहरिःकपिरिति ॥ महागणपतिमिति महन्तस्ते समाचित्ता सुहृद: साधवो येइत्युक्त लक्षणा महन्त :। गणयन्ति येन तत्वानितेगणा : संख्या नामकवेदान्त श्वते गणाश्वतेषां शमादिमतां वेदान्तनिष्ठानां पति : पालक गुरु श्रीनृसिंहाश्रमं गृहतिती गुरु : शिष्येभ्यस्तत्वज्ञान -मुपदिशतीति तन्त्राणीति षतु :षष्टितन्त्राणि : अनेकार्थध्वननमञ्जर्याम् । तन्त्रं शास्त्रं कुलं तन्त्रं तन्त्रं सिद्धौषधं स्मृतम् । तन्त्रं सुखं बलं तन्त्रं तन्त्रं कथन साधनमिति । मन्त्रा एव महान्ति उदकानिधीयन्ते स्मिनिथिमन्त्रमहोदधिग्रन्थः ।

पुष्पिका वाक्यनि:--

इतिश्रीमहिधरविरचिते मन्त्रमहोदधौ भूतशुद्धयादिकथनं नाम
प्रथम स्तरङ्गः ।
" " गणेशमन्त्र कथनं नामद्वितीयस्तरङ्गः ।
" " कालीमन्त्रकथनं नामस्तृतीयस्तरङ्गः ।
" " चतुर्थस्तरङ्गः ।
" " पञ्चमस्तरङ्गः ।
" " षष्ठस्तरङ्गः ।
" " सप्तमस्तरङ्गः ।
" " बालाहाद्यु पांनाष्टमस्तरङ्गः

मन्त्रमहोदधिः

क्रमाङ्कः त्र – ७३  विषयाङ्कः

ग्रन्थकारः महीधरः । मध्यदेशीयं कागतम् । देवनागरी लिपिः । पङ्क्त्य : १२ ।आकारः ११×४$\frac{5}{8}$ । ग्रन्थसंख्या । पत्रसंख्या १२६ समय : संवत् १७३५

मन्त्रमहोदधिः

क्रमाङ्कः प्र- ५५  विषयाङ्क


ग्रन्थकार : महीधर : । मध्यदेशीयं कागतम् । देवनागरी लिपि : । पङ्क्तयः १०: । आकारः १०$\frac{5}{8}$×४$\frac{5}{8}$ । ग्रन्थसंख्या ३०६० । पत्रसंख्या ११५ । समयः सं. १६४५ । ज्येष्ठाष्टमी ।

मन्त्रमहोदधिः

क्रमाङ्कः प्र २४३ विषयाङ्कः

ग्रन्थकारः महीधरः । नेपालीयं कागतम् । देवनागरी लिपिः । पङ्क्तयः ७ । आकारः ६$\frac{7}{4}$×४ । ग्रन्थसंख्या ३५०० ।पत्रसंख्या १३५ । अब्देबिक्रमतो याते बाणवेदनृपैर्मिते

मन्त्रमहोदधिः



क्रमाङ्कः प्र २४३ विषयाङ्कः

ग्रन्थकारः महीधरः । मध्यदेशीयं कागतम् । देवनागरी लिपिः । पङ्क्तयः १० । आकारः ६$\frac{6}{4}$ × ४$\frac{2}{4}$ ग्रन्थसंख्या ३५०० । पत्रसंख्या १३७ ।संवत् १८२४ मिति अगहन वदी १वार शनिश्चर रके लिखादसखत गुरूबकश कायथ काशी मध्यपीअरीपर ।

ज्येष्टाष्टम्यां शिवस्यागे पूर्णे मन्त्रमहोदधौ

मन्त्रमहोदधिः

क्रमाङ्कः प्र ५४३ विषयाङ्कः

ग्रन्थकारः महीधरः । नेपालीयं कागतम् ।देवनागरी लिपि ; ।पङ्क्तय : १२ ।आकारः ८$\frac{4}{8}$×४$\frac{6}{8}$ । ग्रन्थसंख्या १७०० । पत्रसंख्या ४५ ।

मन्त्रमहोदधिः

क्रमङ्कः प्र- ५५ विषयाङ्कः

ग्रन्थकारः महीधरः नेपालीयं कागतम् । देवनागरी लिपिः । पङ्क्यः १२ । आकारः ८$\frac{4}{7}$ ×४$\frac{1}{8}$ । ग्रन्थसंख्या १७०० । पत्रसंख्या ५६ । आदिखण्डितः । अब्देबिक्रमतो याते बाणवेदनृपैर्मिते । ज्येष्ठाष्टम्यां शिवस्यागेपूर्णोमन्त्रमहोदधिः ।

मन्त्रमहोदधि :

क्रमाङ्क : प्र -५५



विषयाङ्कः

ग्रन्थकार : महीधर : । नेपालीयं कागतम् । देवनागरी लिपि : । पङ्क्तय : ११ । आकारः ८$\frac{3}{4}$ × ४$\frac{1}{4}$ । ग्रन्थसंख्या ६०० । पत्रसंख्या २६ । आद्यन्तखण्डितः ।

मन्त्रमहोदधि :

क्रमाङ्क : च १३६ विषयाङ्क :

ग्रन्थकार : महोधर : । नेपालीयं तथा मध्यदेशीयं च कागतम् । देवनागरी लिपिः । पङ्क्तयः ६ । आकार : १०$\frac{1}{2}$×४$\frac{1}{3}$ । ग्रन्थसंख्या ४००० । पत्रसंख्या १७१ । पूर्ण : । समय : १८६८

मन्त्रमहोदधिटीका नौका

क्रमाङ्क : प्र- ५५ विषयाङ्क :

ग्रन्थकार : महिधर :, टीकाकार : महीधर : । नेपालीयं कागतम् । नेवारी लिपि : । पङ्क्तय : ६ । आकार : ११$\frac{3}{4}$×४$\frac{3}{4}$ । ग्रन्थसंख्या १६०० । पत्रसंख्या ६० ।

आदि वाक्यम् :—

श्री गणेशाय नम: । नत्वा लक्ष्मीपति देवं स्वीये मन्त्रमहोदधौ । नावं विरचये रम्यां तरणाय गुणैर्युताम् । तत्र तावन्मन्त्रमहोदधिनामकं तन्त्र विकीर्षुराचार्य: शिष्टाचारपालनाय निर्विघ्नग्रन्थसमाप्तये चेष्टदेवनमनपूर्वकं ग्रन्थकरणं प्रति जानीते प्रणम्येति लक्ष्म्या युक्तो नृहरि : मध्यमपद लोपी समास: गुरुं श्री नृसिंहाश्रमं मन्त्रा एव महान्त्युदकानिधीयन्ते ऽस्मिन्निति मन्त्रमहोदधिग्रन्थ : ।

मन्त्रमहोदधिटीका नौका

क्रमाङ्कः प्र- ५५ विषयाङ्क

ग्रन्थकारःटीकाकारः महीधरः । मध्यदेशीयं कागतम् ।देवनागरी लिपिः । पङ्क्तयः१० आकारः ११ $\frac{1}{4}$×४$\frac{3}{4}$ । ग्रन्थसंख्या १६०० । पत्रसंख्या७६ ।

मन्त्रमहोदधिटीका नौका

क्रमाङ्कः प्र- ५५ बिषयाङ्कः

ग्रन्थकारः टीकाकारः महीधरः। मध्यदेशीयं कागतम्। देवनागरी लिपिः। पङ्क्तयः १३। आकार : ११×४⅝ । ग्रन्थसंख्या १६०० । पत्रसंख्या ८१

सम्बत् १७४३ समये कुआर सुदी बीज (विजया) दशमी वार शुक्र ।

मन्त्रमहोदधिटीका नौका

क्रमाङ्कः च-१३६ बिषयाङ्कः

ग्रन्थकारः टीकाकारः महीधर. । मध्यदेशीयं कागतम्। देवनागरी लिपिः। पङ्क्तयः११।१२ आकारः ६½×३⅕। ग्रन्थसंख्या १६०० । पत्रसंख्या ७१। समयः शा- १६७३

मन्त्रमहोदधिटीका नौका

क्रमाङ्कः प्र-५५ बिषयाङ्कः

ग्रन्थकारो महीधर । नेपालीयं कागतम्। देवनागरी लिपिः। पङ्क्तयः ६। आकारः ६⅛×३ ग्रन्थसंख्या ४०० ।पत्रसंख्या २२ ।(१तः ८ तरङ्गान्तः)

मन्त्रमहोदधिटीकानौका

क्रमाङ्क प्र- २४३ बिषयाङ्कः

टिकाकारो महीधर । मध्यदेशीयं कागतम्। देवनागरी लिपिः । पङ्क्तयः ११ । आकारः ६⅝×४¾ । ग्रन्थसंख्या४०० ।पत्रसंख्या १५ ।

मन्त्रमहोदधिटीका नौका

क्रमाङ्क प्र-५५ बिषयाङ्कः

ग्रन्थकारो टीकाकारो महीधरः। मध्यदेशीयं कागतम। देवनागरी लिपिः। पङ्क्तयः ११ । आकार. १०¼×४⅝ । ग्रन्थ संख्या २०० । पत्रसंख्या ८७ । समयः सम्वत् १७६१ समये नाअगहन वदी १३ ।

मन्त्रमहोदधिटीकानौका

क्रमाङ्कः प्र- ५५

विषयाङ्कः

ग्रन्थकारः टीकाकारः महीधरः । मध्यदेशीयं कागतम् । देवनागरी लिपिः । पङ्क्तयः १० । आकारः ६३/८×४७/८ । ग्रन्थसंख्या १२०० । पत्रसंख्या ६१ । आदि खण्डितम् । समयः संवत् १८२ माघमासे शुक्रपक्षे अष्टम्यां भौम बासरे ।

मन्त्रमहोदधेर्मन्त्रोद्धारः

क्रमाङ्कः प्र २१८

विषयाङ्कः

ग्रन्थकारः । मध्यदेशीयं कागतम् । देवनागरी लिपिः । पङ्क्तयः १०।११।१२ आकारः १०१/२×३७/८ । ग्रन्थसंख्या १३० । पत्रसंख्या ६ । खण्डितः ।

मन्त्रमहोदधेर्मन्त्रप्रस्तारः

क्रमाङ्क प्र- ५५

विषयाङ्कः

ग्रन्थकारः महीधरः । नेपालीयं कागतम् । देवनागरी लिपिः । पङ्क्तयोऽनियताः । आकारोऽनियताः । ग्रन्थसंख्या ५० पत्रसंख्या ३ । प्रकीर्णः ।

मन्त्रमहोदधेर्मन्त्रप्रस्तार :

क्रमाङ्कः प्र- ५५

विषयाङ्कः

ग्रन्थकारः । नेपालीयं कागतम् । देवनागरी लिपिः । पङ्क्तयः १० आकारः १०३/४×४१/८ । ग्रन्थसंख्या१५० । पत्रसंख्या ६ ।
संबत् १७६१ समये नाम मार्ग सीर शुदिघटि बारमङ्गल । इदं पुस्तकं श्रीमन्महाराजधिराज त्रिविक्रमसेनस्येदम् ।

मन्त्रमुक्तावली

क्रमाङ्कः प्र- १५१६

विषयाङ्कः

ग्रन्थकारः ... ... । नेपालीयं कागतम् । देवनागरी लिपिः । पङ्क्तयः ७ । आकारः ७७/८×४ । ग्रन्थसंख्या २५० । पत्रसंख्या २५ । पूर्णा । समयः शाके १६६० ।

आदिवाक्यम् .

